# Ramanama Ashtottarashata Ramayanam

# रामनामाष्टोत्तरशतरामायणम्

## Document Information

Text title : Rama Nama Ashtottarashata Ramayanam

File name : rAmanAmAShTottarashatarAmAyaNam.itx

Category : raama, aShTottarashatanAma, moropant

Location : doc_raama

Proofread by : Milind Khadlikar

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : September 25, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# रामनामाष्टोत्तरशतरामायणम्

श्रीपतिः शेषशयनो रक्ष(१)स्त्रस्तसुरस्तुतः ।
वितीर्णेष्टाभयवरः सत्यसन्धः सुराश्रयः ॥ १॥

ऋष्यशृङ्गेष्टिसम्भूतः सूर्यवंशविभूषणः ।
चतु(२)र्मूर्तिर्दाशरथिः कौसल्येयोऽतिसुन्दरः ॥ २॥

कैकेयीनन्दनो रामः सुमित्रानन्दवर्धनः ।
लक्ष्मणानुचरो विद्वान् वसिष्ठच्छात्रसत्तमः ॥ ३॥

कौशिकात्तधनुर्वेदः सर्वशस्त्रास्त्रविद्वरः ।
ताडका(३)स्वनिलाहीषुर्मखप्रत्यूहनाशनः ॥ ४॥

सुबाहुप्राणसंहर्ता मारीच(४)स्मयभञ्जनः ।
अहल्यांहो(५)नगपविः शतानन्दस्तवाञ्चितः ॥ ५॥

महेश्वरधनुर्भेत्ता जानकीप्राणवल्लभः ।
जामदग्न्याहङ्कृतिघ्नः पितृचित्तप्रसाधकः ॥ ६॥

गुर्वर्थत्यक्तराज्यश्रीर्दारानुजसमन्वितः ।
सुमन्त्रसूतः सत्वाढ्यो वल्कली गुहसत्कृतः ॥ ७॥

भरद्वाजाभ्यनुज्ञातश्चित्रकूटकृतस्थितिः ।
निवापविधि(६)सन्निष्ठो भरतार्पितपादुकः ॥ ८॥

लब्धात्रिसत्कृतिः श्रीमान् मुनिप्रणतिसादरः ।
विराधोद्धरणोत्साही शरभङ्ग(७)सभाजितः ॥ ९॥

सुतीक्ष्णकृतसत्कारः कुम्भसम्भवपूजितः ।
कृतपञ्चवटीवासो जटायुर्विहितादरः ॥ १०॥

छिन्नशूर्पणखाघ्राणः खरघ्नो दूषणान्तकः ।
मायास्वर्णैणमारीचरक्षःप्राणापहारकः ॥ ११॥

यतिच्छद्मदशग्रीव(८)हृतप्राणप्रियाङ्गनः ।
दयिताविरहात्यार्त(९)सर्वकामिविडम्बकः ॥ १२॥

स्वतातसखगृध्रेन्द्रसुदुरापगतिप्रदः ।
कबन्धबाहुबन्धच्छित् शबरीक्षण निर्वृतः ॥ १३॥

पम्पातीरस्मृतप्राणप्रेयसीशोकविह्वलः ।
हनूमद्दर्शनप्रीतः सुग्रीवकृतसौहृदः ॥ १४॥

प्रियोत्तरीयभूषेक्षास्पर्शानन्दनिमीलितः ।
सप्ततालभिदुद्दामवालिहृद्भेदनिष्ठुरः ॥ १५॥

सुग्रीवार्पितराज्यश्रीरङ्गजाङ्गदवत्सलः ।
प्रियान्वेषणनु(१०)न्नर्क्षकुञ्जरप्लवगर्षभः ॥ १६॥

(११)स्तुततीर्णाब्धिदृष्टार्थदग्धलङ्काञ्जनाङ्गजः ।
नैकर्क्षवानरचमूशतकम्पितभूनगः ॥ १७॥

शरण्यः शरणप्राप्तबिभीषणकृतोदयः ।
सेतुकृत्तीर्णवाराशिः सामार्थप्रहिताङ्गदः ॥ १८॥

रक्षःकक्षमहादावो मेघनादान्तकानुजः ।
कुम्भकर्णाद्रिवज्रेषुर्दशास्यगजकेसरिः ॥ १९॥

दत्तदिव्यप्रियोपेतः पुष्पकाक्रमिताम्बरः ।
गुहविश्लेषतापघ्नो भरद्वाजाप्तसद्वरः ॥ २०॥

भरतप्रियकृद्राजपौरगुर्वभिषेचितः ।
अगस्त्यादिमहर्षीड्यः सर्वप्राणिहितोद्यतः ॥ २१॥

कृतप्रजातिकल्याणो व्य(१२)सुविप्रात्मजासुदः ।
शत्रुघ्नघातितात्युग्रद्विजारिलवणासुरः ॥ २२॥

त्रिजगद्गीतसत्कीर्तिरेकदुर्मतिनिन्दितः ।
संत्यक्त(१३)सत्वसम्पन्नोदारदारसमागमः ॥ २३॥

प्राचेतसाश्रमप्राप्ततेजःकुशलवात्मजः ।
अश्वमेधोत्सवावाप्तवाल्मीकिच्छात्रनन्दनः ॥ २४॥

भूयोदिव्यमहीमग्नमहिलाविरहातुरः ।
पुत्राष्टकपृथग्दत्तराज्यः प्राज्यप्रसादकृत् ॥ २५॥

शासना(१४)तिक्रमत्यक्तप्राणात्यधिकलक्ष्मणः ।
विहितस्वयशस्तुल्यप्रभञ्जनसुतस्थितिः ॥ २६॥

आर्केन्दु(१५)भूमि स्वकथाबिभीषणकृताभयः ।
सुहृद्भरतशत्रुघ्नसुग्रीवात्मगतिप्रदः ॥ २७॥

सर्वसत्वप्रियः पौरस्थितिसन्तानलोककृत् ।
विमानारोपिताशेषराष्ट्रायोध्याजनः प्रभुः ॥ २८॥

पवित्रसेव्यचरितो निगमाद्य(१६)कविस्तुतः ।
नमन्(१७)मयूरमुदिरः पुण्यश्लोकशिखामणिः ॥ २९॥

इति श्रीरामभद्रस्य नाम्नामष्टोत्तरं शतम् ।
रामायणपयोराशेरुद्धृतं परमामृतम् ॥ ३०॥

श्रीरामः जयति ॥

इति श्रीरामनन्दनमयूरेश्वरकृतं रामनामाष्टोत्तरशतरामायणं सम्पूर्णम् ।

Footnotes

१. रक्षोभ्यः त्रस्ताः सुराः तैः स्तुतः ।

२. चतस्रः रामलक्ष्मणभरतशत्रुघ्नरूपा मूर्तयो यस्य सः ।

३. ताडकायाः अस्वनिलः प्राणवायुः तस्य अहिरिव सर्प इव इषुर्बाणो यस्य सः ।

४. स्मयो दर्पः।

५. अहल्याया अंहांसि दुरितानि तेषां नगः पर्वतः महान् समूह इत्यर्थः, तस्य पविः वज्रमिव ।

६. निवापः पितृभ्यो जलाञ्जलिदानम्, तस्य विधिः तस्मिन् सती निरतिशया निष्ठा यस्य सः ।

७. शरभङ्गेण मुनिना सभाजितः पूजितः ।

८. यतिच्छद्मना कपटयतिवेषेण रावणेन हृता प्राणेभ्योऽपि प्रिया अङ्गना यस्य सः ।

९. दयिताया विरहेण नितरां पीडिताः ये निखिलाः कामिनस्तान् विडम्बयतीति तादृशः ।

१०. प्रियान्वेषणार्थं नुन्नः प्रेरितः ऋक्षकुञ्जरो जाम्बवान्

प्लवगर्षभाः वानरश्रेष्ठाश्च हनूमत्प्रभृतयो येन ।
११. स्तुतः तीर्णाब्धिः दृष्टसीतारूपार्थः दग्धलङ्कश्च
अञ्जनाङ्गजो हनूमान् येन ।
१२. व्यसवे मृताय विप्रात्मजाय असून् ददातीति तादृशः ।
१३. सन्त्यक्तः परित्यक्तः सत्वसम्पन्नानां आपन्नसत्वानामुदाराणां च
दाराणां सीताया इति यावत् भार्यायाः समागमो येन सः ।
१४. शासनातिक्रमादाज्ञाभङ्गाद्धेतोः त्यक्तः प्राणेभ्योऽपि गरीयान्
लक्ष्मणः येन । दृश्यतां कथाविज्ञानाय रामायणस्योत्तरकाण्डस्य
पञ्चाधिकशततमः सर्गः ।
१५. आर्केन्दुभूमि यावत् सूर्यः चन्द्रमाः पृथिवी च तिष्ठन्ति
तावदित्यर्थः ।
१६. निगमैः ऋगादिभिः आद्यकविना च स्तुतः ।
१७. नमन्तः भक्ता एव मयूरास्तेषां मुदिर इव मेघ इव
निरतिशयानन्दजननः । अथवा कविपक्षे । नमन प्रणतो यो
मयूरकविस्तं मोदयतीति तच्छीलः ।

Proofread by Milind Khadilkar

*Ramanama Ashtottarashata Ramayanam*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*